श्री काळी कर्पूर स्तोत्रं

श्री काळी कर्पूर स्तोत्रं

कर्पूरं मध्यमांत्य स्वरपररहितं सेंदुवामाक्षियुक्तं
बीजं ते मातरेतत्त्रिपुरहरवधु त्रिःकृतं ये जपंति |
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसंत्येव वाचः
स्वच्छंदं ध्वांतधाराधररुचिरुचिरे सर्वसिद्धिं गतानां || 1 ||

ईशानः सेंदुवामश्रवणपरिगतो बीजमन्यन्महेशि
द्वंद्वं ते मंदचेता यदि जपति जनो वारमेकं कदाचित् |
जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नंबुजाक्षि
वृंदं चंद्रार्धचूडे प्रभवति स महाघोरबाणावतंसे || 2 ||

ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो
बीजं ते द्वंद्वमन्यद्विगळितचिकुरे काळिके ये जपंति |
द्वेष्टारं घ्नंति ते च त्रिभुवनमपि ते वश्यभावं नयंति
सृक्कद्वंद्वास्रधाराद्वयधरवदने दक्षिणे काळिकेति || 3 ||

ऊर्ध्वे वामे कृपाणं करकमलतले छिन्नमुंडं तथोऽधः
सव्येऽभीतिं वरं च त्रिजगदघहरे दक्षिणे काळिके च |
जप्त्वैतन्नाम ये वा तव विमलतनुं भावयंत्येतदंब
तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यंबकस्य || 4 ||

वर्गाद्यं वह्निसंस्थं विधुरतिवलितं तत्त्रयं कूर्चयुग्मं
लज्जाद्वंद्वं च पश्चात् स्मितमुखितदधष्ठद्वयंयोजयित्वा |
मातर्ये त्वां जपंति स्मरहरमहिळे भावयंतः स्वरूपं
ते लक्ष्मीलास्यलीलाकमलदळदृशः कामरूपा भवंति || 5 ||

प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यंतगुह्यं
त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयंतो जपंति |
तेषां नेत्रारविंदे विहरति कमला वक्त्रशुभ्रांशुबिंबे
वाग्देवी देवि मुंडस्रगतिशयलसत्कंठ पीनस्तनाढ्ये || 6 ||

गतासूनां बाहुप्रकरकृतकांचीपरिलस-
-न्नितंबां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनां |
श्मशानस्थे तल्पे शवहृदि महाकालसुरत-
-प्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कविः || 7 ||

शिवाभिर्घोराभिः शवनिवहमुंडाऽस्थि निकरैः
परं संकीर्णायां प्रकटितचितायां हरवधूं |
प्रविष्टां संतुष्टामुपरिसुरतेनाति युवती
सदा त्वां ध्यायंति क्वचिदपि न तेषां परिभवः || 8 ||

वदामस्ते किं वा जननि वयमुच्चैर्जडधियो
न धाता नापीशो हरिरपि न ते वेत्ति परमं |
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते
तदेतत् क्षंतव्यं न खलु पशुरोषः समुचितः || 9 ||

समंतादापीनस्तनजघनदृग्यौवनवती
रतासक्तो नक्तं यदि जपति भक्तस्तव मनुं |
विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः || 10 ||

समाः स्वस्थीभूतां जपति विपरीतां यदि सदा
विचिंत्य त्वां ध्यायन्नतिशयमहाकालसुरतां |
तदा तस्य क्षोणीतलविहरमाणस्य विदुषः
करांभोजे वश्या हरवधु महासिद्धि निवहाः || 11 ||

प्रसूते संसारं जननि जगतीं पालयति च
समस्तं क्षित्यादि प्रळयसमये संहरति च |
अतस्त्वां धाताऽपि त्रिभुवनपतिः श्रीपतिरपि
महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीं || 12 ||

अनेके सेवंते भवदधिकगीर्वाणनिवहान्
विमूढास्ते मातः किमपि न हि जानंति परमं |
समाराध्यामाद्यां हरिहरविरिंच्यादिविबुधैः
प्रपन्नोऽस्मि स्वैरं रतिरसमहानंदनिरतां || 13 ||

धरित्री कीलालं शुचिरपि समीरोऽपि गगनं
त्वमेका कल्याणी गिरिशरमणी काळि सकलं |
स्तुतिः का ते मातस्तव करुणया मामगतिकं
प्रसन्ना त्वं भूया भवमननुभूयान्मम जनुः || 14 ||

श्मशानस्थः सुस्थो गलितचिकुरो दिक्पटधरः
सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमं |
जपंस्त्वत् प्रत्येकं मनुमपि तव ध्याननिरतो
महाकाळि स्वैरं स भवति धरित्री परिवृढः || 15 ||

गृहे सम्मार्जन्या परिगळित वीर्यं हि चिकुरं
समूलं मध्याह्ने वितरति चितायां कुजदिने |
समुच्चार्य प्रेम्णा मनुमपि सकृत् काळि सततं
गजारूढो याति क्षितिपरिवृढः सत्कविवरः || 16 ||

सुपुष्पैराकीर्णं कुसुमधनुषोमंदिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुं |
सगंधर्वश्रेणीपतिरपि कवित्वामृतनदी
नदीनः पर्यंते परमपदलीनः प्रभवति || 17 ||

त्रिपंचारे पीठे शवशिवहृदि स्मेरवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरतां |
समासक्तो नक्तं स्वयमपि रतानंदनिरतो
जनो यो ध्यायेत्त्वां जननि किल सस्यात् स्मरहरः || 18 ||

सलोमास्थि स्वैरं पललमपि मार्जारमसिते
परं चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा |
बलिं ते पूजायामपि वितरतां मर्त्यवसतां
सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति || 19 ||

वशी लक्षं मंत्रं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणयुगळ ध्यान निपुणः |
परं नक्तं नग्नो निधुवन विनोदेन च मनुं
जपेल्लक्षं सम्यक् स्मरहरसमानः क्षितितले || 20 ||

इदं स्तोत्रं मातस्तव मनुसमुद्धारण जनुः
स्वरूपाख्यं पादांबुजयुगळपूजाविधियुतं |
निशार्धे वा पूजासमयमधि वा यस्तु पठति
प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः || 21 ||

कुरंगाक्षीबृंदं तमनुसरति प्रेमतरळं
वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः |
रिपुः कारागारं कलयति च तं केळिकलया
चिरं जीवन्मुक्तः स भवति च भक्तः प्रतिजनुः || 22 ||

इति श्रीमहाकालविरचितं श्री काळी कर्पूर स्तोत्रं |